# सांख्यसूत्राणि

**अनुक्रमणिका** ( जिस विषय को पढ़ना हो, उसे स्पर्श करें )


सांख्यसूत्राणि ........................................ 1

प्रथमोऽध्यायः ........................................ 2

द्वितीयोऽध्यायः ........................................ 11

तृतीयोऽध्यायः ........................................ 14

चतुर्थोऽध्यायः ........................................ 19

पञ्चमोऽध्यायः ........................................ 21

षष्ठोऽध्यायः ........................................ 29

# प्रथमोऽध्यायः

1. अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः ॥ १.१ ॥
2. न दृष्टात् तत्सिद्धिर्निवृत्तेरप्यनुवृत्तिदर्शनात् ॥ १.२ ॥
3. प्रात्यहिकक्षुत्प्रतीकारवत्तत्प्रतीकारचेष्टनात् पुरुषार्थत्वम् ॥ १.३ ॥
4. सर्वासम्भवात् सम्भवेऽपि सत्त्वासम्भवाद्धेयः प्रमाणकुशलैः ॥ १.४ ॥
5. उत्कर्षादपि मोक्षस्य सर्वोत्कर्षश्रुतेः ॥ १.५ ॥
6. अविशेषश्चोभयोः ॥ १.६ ॥
7. न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः ॥ १.७ ॥
8. स्वभावस्यानपायित्वादननुष्ठानलक्षणमप्रामाण्यम् ॥ १.८ ॥
9. नाशक्योपदेशविधिरुपदिष्टेऽप्यनुपदेशः ॥ १.९ ॥
10. शुक्लपटवद्बीजवच्चेत् ॥ १.१० ॥
11. शक्त्युद्भवानुद्भवाभ्यां नाशक्योपदेशः ॥ १.११ ॥
12. न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात् ॥ १.१२ ॥
13. न देशयोगतोऽप्यस्मात् ॥ १.१३ ॥
14. नावस्थातो देहधर्मत्वात् तस्याः ॥ १.१४ ॥
15. असङ्गोऽयं पुरुष इति ॥ १.१५ ॥
16. न कर्मणाऽन्यधर्मत्वादतिप्रसक्तेश्च ॥ १.१६ ॥
17. विचित्रभोगानुपपत्तिरन्यधर्मत्वे ॥ १.१७ ॥

Pustakam

18.प्रकृतिनिबन्धनाच्चेन्न तस्या अपि पारतन्त्र्यम् ॥ १.१८ ॥

19.न नित्यशुद्धबुद्धमुक्तस्वभावस्य तद्योगस्तद्योगादृते ॥ १.१९ ॥

20.नाविद्यातोऽप्यवस्तुना बन्धायोगात् ॥ १.२० ॥

21.वस्तुत्वे सिद्धान्तहानिः ॥ १.२१ ॥

22.विजातीयद्वैतापत्तिश्च ॥ १.२२ ॥

23.विरुद्धोभयरूपा चेत् ॥ १.२३ ॥

24.न तादृक् पदार्थाप्रतीतेः ॥ १.२४ ॥

25.न वयं षट्पदार्थ [ आदि ] वादिनो वैशेषिकादिवत् ॥ १.२५ ॥

26.अनियतत्वेऽपि नायौक्तिकस्य संग्रहोऽन्यथा बालोन्मत्तादिसमत्वम् ॥ १.२६ ॥

27.नानादिविषयोपरागनिमित्तोऽप्यस्य ॥ १.२७ ॥

28.न बाह्याभ्यन्तरयोरुपरञ्ज्योपरञ्जकभावोऽपि देशव्यवधानात् स्रुघ्नस्थपाटलिपुत्रस्थयोरिव ॥ १.२८ ॥

29.द्वयोरेकदेशलब्धोपरागान्न व्यवस्था ॥ १.२९ ॥

30.अदृष्टवशाच्चेत् ॥ १.३० ॥

31.न द्वयोरेककालायोगादुपकार्योपकारकभावः ॥ १.३१ ॥

32.पुत्रकर्मवदिति चेत् ॥ १.३२ ॥

33.नास्ति हि तत्र स्थिर एकात्मा यो गर्भाधानादिना संस्क्रियते ॥ १.३३ ॥

34.स्थिरकार्यासिद्धेः क्षणिकत्वम् ॥ १.३४ ॥

35.न प्रत्यभिज्ञाबाधात् ॥ १.३५ ॥

Pustakam

36.श्रुतिन्यायविरोधाच्च ॥ १.३६ ॥

37.दृष्टान्तासिद्धेश्च ॥ १.३७ ॥

38.युगपज्जायमानयोर्न कार्यकारणभावः ॥ १.३८ ॥

39.पूर्वापाये उत्तरायोगात् ॥ १.३९ ॥

40.तद्भावे तदयोगादुभयव्यभिचारादपि न ॥ १.४० ॥

41.पूर्वभाविमात्रे न नियमः ॥ १.४१ ॥

42.न विज्ञानमात्रं बाह्यप्रतीतेः ॥ १.४२ ॥

43.तदभावे तदभावाच्छून्यं तर्हि ॥ १.४३ ॥

44.शून्यं तत्त्वं भावो विनश्यति वस्तुधर्मत्वाद् विनाशस्य ॥ ४४ ॥

45.अपवादमात्र मबुद्धानाम् ॥ १.४५ ॥

46.उभयपक्षसमानक्षेमत्वादयमपि ॥ १.४६ ॥

47.अपुरुषार्थत्वमुभयथा ॥ १.४७ ॥

48.न गतिविशेषात् ॥ १.४८ ॥

49.निष्क्रियस्य तदसम्भवात् ॥ १.४९ ॥

50.मूर्तत्वाद् घटादिवत्समानधर्मापत्तावपसिद्धान्तः ॥ १.५० ॥

51.गतिश्रुतिरप्युपाधियोगादाकाशवत् ॥ १.५१ ॥

52.न कर्मणाऽप्यतद्धर्मत्त्वात् ॥ १.५२ ॥

53.अतिप्रसक्तिरन्यधर्मत्वे ॥ १.५३ ॥

54.निर्गुणादिश्रुतिविरोधश्चेति ॥ १.५४ ॥



Pustakam

55.तद्योगोऽप्यविवेकान्न समानत्वम् ॥ १.५५ ॥

56.नियतकारणात्तदुच्छित्तिर्ध्वान्तवत् ॥ १.५६ ॥

57.प्रधानाविवेकादन्याविवेकस्य तद्धाने हानम् ॥ १.५७ ॥

58.वाङ्मात्रं न तु तत्त्वं चित्तस्थितेः ॥ १.५८ ॥

59.युक्तितोऽपि न बाध्यते दिङ्मूढवदपरोक्षादृते ॥ १.५९ ॥

60.अचाक्षुषाणामनुमानेन बोधो धूमादिभिरिव वह्नेः ॥ १.६० ॥

61.सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात्पञ्चतन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणः ॥ १.६१ ॥

62.स्थूलात् पञ्चतन्मात्रस्य ॥ १.६२ ॥

63.बाह्याभ्यन्तराभ्यां तैश्चाहङ्कारस्य ॥ १.६३ ॥

64.तेनान्तःकरणस्य ॥ १.६४ ॥

65.ततः प्रकृतेः ॥ १.६५ ॥

66.संहतपरार्थत्वात् पुरुषस्य ॥ १.६६ ॥

67.मूले मूलाभावादमूलं मूलम् ॥ १.६७ ॥

68.पारम्पर्येऽप्येकत्र परिनिष्ठेति संज्ञामात्रम् ॥ १.६८ ॥

69.समानः प्रकृतेर्द्वयोः ॥ १.६९ ॥

70.अधिकारित्रैविध्यान्न नियमः ॥ १.७० ॥

71.महदाख्यमाद्यं कार्यं तन्मनः ॥ १.७१ ॥

Pustakam

72.चरमोऽहंकारः ॥ १.७२ ॥

73.तत्कार्यत्वमुत्तरेषाम् ॥ १.७३ ॥

74.आद्यहेतुता तद्द्वारा पारम्पर्येऽप्यणुवत् ॥ १.७४ ॥

75.पूर्व भावित्वे द्वयोरेकतरस्य हानेऽन्यतरयोगः ॥ १.७५ ॥

76.परिच्छिन्नत्वान्न सर्वोपादानम् ॥ १.७६ ॥

77.तदुत्पत्तिश्रुतेश्च ॥ १.७७ ॥

78.नावस्तुनो वस्तुसिद्धिः ॥ १.७८ ॥

79.अबाधाददुष्टकारणजन्यत्वाच्च नावस्तुत्वम् ॥ १.७९ ॥

80.भावे तद्योगेन तत्सिद्धिरभावे तदभावात् कुतस्तरां तत्सिद्धिः ॥ १.८० ॥

81.न कर्मण उपादानत्वायोगात् ॥ १.८१ ॥

82.नानुश्रविकादपि तत्सिद्धिः साध्यत्वेनावृत्तियोगादपुरुषार्थत्वम् ॥ १.८२ ॥

83.तत्र प्राप्तविबेकस्यानावृत्तिश्रुतिः ॥ १.८३ ॥

84.दुःखाद् दुःखं जलाभिषेकवन्न जाड्यविमोक्षः ॥ १.८४ ॥

85.काम्याकाम्येऽपि साध्यत्वाविशेषात् ॥ १.८५ ॥

86.निजमुक्तस्य बन्धध्वंसमात्रं परं न समानत्वम् ॥ १.८६ ॥

87.द्वयोरेकतरस्य वाऽप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा, तत्साधकतमं यत्तत् त्रिविधं प्रमाणम् ॥ ८७ ॥

88.तत्सिद्धौ सर्वसिद्धेर्नाधिक्यसिद्धिः ॥ १.८८ ॥

89.यत्सम्बन्धसिद्धं तदाकारोल्लेखि विज्ञानं तत्प्रत्यक्षम् ॥ १.८९ ॥

Pustakam

90.योगिनामबाह्यप्रत्यक्षत्वान्न दोषः ॥ १.९० ॥

91.लीनवस्तुलब्धातिशयसम्बन्धाद्वाऽदोषः ॥ १.९१ ॥

92.ईश्वरासिद्धेः ॥ १.९२ ॥

93.मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः ॥ १.९३ ॥

94.उभयथाप्यसत्करत्वम् ॥ १.९४ ॥

95.मुक्तात्मनः प्रशंसोपासासिद्धस्य वा ॥ १.९५ ॥

96.तत्सन्निधानादधिष्ठातृत्वं मरिणवत् ॥ १.९६ ॥

97.विशेषकार्येष्वपि जीवानाम् ॥ १.९७ ॥

98.सिद्धरूपबोद्धृत्वाद्वाक्यार्थोपदेशः ॥ १.९८ ॥

99.अन्तःकरणस्य तदुज्ज्वलितत्वाल्लोहवदधिष्ठातृत्वम् ॥ १.९९ ॥

100.प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानम् ॥ १.१०० ॥

101.आप्तोपदेशः शब्दः ॥ १.१०१ ॥

102.उभयसिद्धिः प्रमाणात् तदुपदेशः ॥ १.१०२ ॥

103.सामान्यतो दृष्टादुभयसिद्धिः ॥ १.१०३ ॥

104.चिदवसानो भोगः ॥ १.१०४ ॥

105.अकर्तुरपि फलोपभोगोऽन्नाद्यवत् ॥ १.१०५ ॥

106.अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः ॥ १.१०६ ॥

107.नोभयं च तत्त्वाख्याने ॥ १.१०७ ॥

108.विषयोऽविषयोऽप्यतिदूरादेर्हानोपादानाभ्यामिन्द्रियस्य ॥ १.१०८ ॥

109.सौक्ष्म्यात् तदनुपलब्धिः ॥ १.१०९ ॥

110.कार्यदर्शनात् तदुपलब्धिः ॥ १.११० ॥

111.वादिविप्रतिपत्तेस्तदसिद्धिरिति चेत् ॥ १.१११ ॥

112.तथाप्येकतरदृष्ट्याऽन्यतरसिद्धेर्नापलापः ॥ १.११२ ॥

113.त्रिविधविरोधापत्तेश्च ॥ १.११३ ॥

114.नासदुत्पादो नृशृङ्गवत् ॥ १.११४ ॥

115.उपादाननियमात् ॥ १.११५ ॥

116.सर्वत्र सर्वदा सर्वासम्भवात् ॥ १.११६ ॥

117.शक्तस्य शक्यकरणात् ॥ १.११७ ॥

118.कारणभावाच्च ॥ १.११८ ॥

119.भावे भावयोगश्चेन्न वाच्यम् ॥ १.११९ ॥

120.नाभिव्यक्तिनिबन्धनौ व्यवहाराव्यवहारौ ॥ १.१२० ॥

121.नाशः कारणलयः ॥ १.१२१ ॥

122.पारम्पर्यतोऽन्वेषणा बीजाङ्कुरवत् ॥ १.१२२ ॥

123.उत्पत्तिवद्वाऽदोषः ॥ १.१२३ ॥

124.हेतुमदनित्यं सक्रियमनेकमाश्रितं लिङ्गम् ॥ १.१२४ ॥

125.आञ्जस्यादभेदतो वा गुणसामान्यादेस्तत्सिद्धिः प्रधानव्यपदेशाद्वा ॥ १.१२५ ॥

126.त्रिगुणाचेतनत्वादि द्वयोः ॥ १.१२६ ॥

127.प्रीत्यप्रीतिविषादाद्यैर्गुणानामन्योऽन्यं वैधर्म्यम् ॥ १.१२७ ॥

Pustakam

128.लघ्वादिधर्मैः साधर्म्यं वैधर्म्यं च गुणानाम् ॥ १.१२८ ॥

129.उभयान्यत्वात् कार्यत्वं महदादेर्घटादिवत् ॥ १.१२९ ॥

130.परिमाणात् ॥ १.१३० ॥

131.समन्वयात् ॥ १.१३१ ॥

132.शक्तितश्चेति ॥ १.१३२ ॥

133.तद्धाने प्रकृतिः पुरुषो वा ॥ १.१३३ ॥

134.तयोरन्यत्वे तुच्छत्वम् ॥ १.१३४ ॥

135.कार्यात् कारणानुमानं तत्साहित्यात् ॥ १.१३५ ॥

136.अव्यक्तं त्रिगुणाल्लिङ्गात् ॥ १.१३६ ॥

137.तत्कार्यतस्तत्सिद्धेर्नापलापः ॥ १.१३७ ॥

138.सामान्येन विवादाभावाद् धर्मवन्न साधनम् ॥ १.१३८ ॥

139.शरीरादिव्यतिरिक्तः पुमान् ॥ १.१३९ ॥

140.संहतपरार्थत्वात् ॥ १.१४० ॥

141.त्रिगुणादिविपर्ययात् ॥ १.१४१ ॥

142.अधिष्ठानाच्चेति ॥ १.१४२ ॥

143.भोक्तृभावात् ॥ १.१४३ ॥

144.कैवल्यार्थं प्रवृत्तेश्च ॥ १.१४४ ॥

145.जडप्रकाशायोगात् प्रकाशः ॥ १.१४५ ॥

146.निर्गुणत्वान्न चिद्धर्मा ॥ १.१४६ ॥

147.श्रुत्या सिद्धस्य नापलापस्तत्प्रत्यक्षबाधात् ॥ १.१४७ ॥

148.सुषुप्त्याद्यसाक्षित्वम् ॥ १.१४८ ॥

149.जन्मादिव्यवस्थातः पुरुषबहुत्वम् ॥ १.१४९ ॥

150.उपाधिभेदेऽप्येकस्य नानायोग आकाशस्येव घटादिभिः ॥ १.१५० ॥

151.उपाधिर्भिद्यते न तु तद्वान् ॥ १.१५१ ॥

152.एवमेकत्वेन परिवर्तमानस्य न विरुद्धधर्माध्यासः ॥ १.१५२ ॥

153.अन्यधर्मत्वेऽपि नारोपात् तत्सिद्धिरेकत्वात् ॥ १.१५३ ॥

154.नाद्वैतश्रुतिविरोधो जातिपरत्वात् ॥ १.१५४ ॥

155.विदितबन्धकारणस्य दृष्ट्या तद्रूपम् ॥ १.१५५ ॥

156.नान्धादृष्ट्या चक्षुष्मतामनुपलम्भः ॥ १.१५६ ॥

157.वामदेवादिर्मुक्तो नाद्वैतम् ॥ १.१५७ ॥

158.अनादावद्ययावदभावाद्भविष्यदप्येवम् ॥ १.१५८ ॥

159.इदानीमिव सर्वत्र नात्यन्तोच्छेदः ॥ १.१५९ ॥

160.पुरुषस्यात्यन्तबन्धोच्छेदाभावे यद्वा परममोक्षाभावे हेतुरुच्यते व्यावृत्तोभयरूपः ॥ १.१६० ॥

161.साक्षात् सम्बन्धात् साक्षित्वम् ॥ १.१६१ ॥

162.नित्यमुक्तत्वम् ॥ १.१६२ ॥

163.औदासीन्यं चेति ॥ १.१६३ ॥

164.उपरागात् कर्तृत्वं चित्सान्निध्यात् चित्सान्निध्यात् ॥ १.१६४ ॥

Pustakam

# द्वितीयोऽध्यायः

1. विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य ॥ २.१ ॥
2. विरक्तस्य तत्सिद्धेः ॥ २.२ ॥
3. न श्रवणमात्रात् तत्सिद्धिरनादिवासनाया बलवत्त्वात् ॥ २.३ ॥
4. बहुभृत्यवद्वा प्रत्येकम् ॥ २.४ ॥
5. प्रकृतिवास्तवे च पुरुषस्याध्याससिद्धिः ॥ २.५ ॥
6. कार्यतस्तत्सिद्धिः ॥ २.६ ॥
7. चेतनोद्देशान्नियमः कण्टकमोक्षवत् ॥ २.७ ॥
8. अन्ययोगेऽपि तत्सिद्धिर्नाञ्जस्येनायोदाहवत् ॥ २.८ ॥
9. रागविरागयोर्योगः सृष्टिः ॥ २.९ ॥
10. महदादिक्रमेण पञ्चभूतानाम् ॥ २.१० ॥
11. आत्मार्थत्वात् सृष्टेर्नैषामात्मार्थ आरम्भः ॥ २.११ ॥
12. दिक्कालावाकाशादिभ्यः ॥ २.१२ ॥
13. अध्यवसायो बुद्धिः ॥ २.१३ ॥
14. तत्कार्यं धर्मादिः ॥ २.१४ ॥
15. महदुपरागाद् विपरीतम् ॥ २.१५ ॥
16. अभिमानोऽहङ्कारः ॥ २.१६ ॥
17. एकादश पञ्चतन्मात्रं तत्कार्यम् ॥ २.१७ ॥

Pustakam

18.सात्त्विकमेकादशकं प्रवर्तते वैकृतादहङ्कारात् ॥ २.१८ ॥

19.कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकम् ॥ २.१९ ॥

20.आहङ्कारिकत्वश्रुतेर्न भौतिकानि ॥ २.२० ॥

21.देवतालयश्रुतिर्नारम्भकस्य ॥ २.२१ ॥

22.तदुत्पत्तिश्रुतेर्विनाशदर्शनाच्च ॥ २.२२ ॥

23.अतीन्द्रियमिन्द्रियं भ्रान्तानामधिष्ठाने ॥ २.२३ ॥

24.शक्तिभेदेऽपि भेदसिद्धौ नैकम् ॥ २.२४ ॥

25.न कल्पनाविरोधः प्रमाणदृष्टस्य ॥ २.२५ ॥

26.उभयात्मकञ्च मनः ॥ २.२६ ॥

27.गुणपरिणामभेदान्नानात्वमवस्थावत् ॥ २.२७ ॥

28.रूपादिरसमलान्त उभयोः ॥ २.२८ ॥

29.द्रष्टृत्वादिरात्मनः करणत्वमिन्द्रियाणाम् ॥ २.२९ ॥

30.त्रयाणां स्वालक्षण्यम् ॥ २.३० ॥

31.सामान्या [ न्यकर ? ] करणवृत्तिः प्राणाख्याः [ प्राणाद्याः ? ] वायवः पञ्च ॥ २.३१ ॥

32.क्रमशोऽक्रमशश्चेन्द्रियवृत्तिः ॥ २.३२ ॥

33.वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाश्च ॥ २.३३ ॥

34.तन्निवृत्तावुपशान्तोपरागः स्वस्थः ॥ २.३४ ॥

35.कुसुमवच्च मणिः ॥ २.३५ ॥

Pustakam

36.पुरुषार्थं करणोद्भवोऽप्यदृष्टोल्लासात् ॥ २.३६ ॥

37.धेनुवद् वत्साय ॥ २.३७ ॥

38.करणं त्रयोदशविधमवान्तरभेदात् ॥ २.३८ ॥

39.इन्द्रियेषु साधकतमत्वयोगात् कुठारवत् ॥ २.३९ ॥

40.द्वयोः प्रधानं मनो लोकवद् भृत्यवर्गेषु ॥ २.४० ॥

41.अव्यभिचारात् ॥ २.४१ ॥

42.तथाऽशेषसंस्काराधारत्वात् ॥ २.४२ ॥

43.स्मृत्याऽनुमानाच्च ॥ २.४३ ॥

44.सम्भवेन्न स्वतः ॥ २.४४ ॥

45.आपेक्षिको गुणप्रधानभावः क्रियाविशेषात् ॥ २.४५ ॥

46.तत्कर्मार्जितत्वात् तदर्थमभिचेष्टा लोकवत् ॥ २.४६ ॥

47.समानकर्मयोगे बुद्धेः प्राधान्यं लोकवत्-लोकवत् ॥ २.४७ ॥

Pustakam

# तृतीयोऽध्यायः

1. अविशेषाद् विशेषारम्भः ॥ ३.१ ॥

2. तस्माच्छरीरस्य ॥ ३.२ ॥

3. तद्बीजात् संसृतिः ॥ ३.३ ॥

4. आविवेकाच्च प्रवर्तनमविशेषाणाम् ॥ ३.४ ॥

5. उपभोगादितरस्य ॥ ३.५ ॥

6. सम्प्रति परिष्वक्तो द्वाभ्याम् ॥ ३.६ ॥

7. मातापितृजं स्थूलं प्रायश इतरन्न ॥ ३.७ ॥

8. पूर्वोत्पत्तेस्तत्कार्यत्वं भोगादेकस्य नेतरस्य ॥ ३.८ ॥

9. सप्तदशैकं लिङ्गम् ॥ ३.९ ॥

10. व्यक्तिभेदः कर्मविशेषात् ॥ ३.१० ॥

11. तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः ॥ ३.११ ॥

12. न स्वातन्त्र्यात् तदृते छायावच्चित्रवच्च ॥ ३.१२ ॥

13. मूर्तत्वेऽपि न सङ्घातयोगात्तरणिवत् ॥ ३.१३ ॥

14. अणुपरिमाणं तत्कृतिश्रुतेः ॥ ३.१४ ॥

15. तदन्नमयत्व ( ादि ) श्रुतेश्च ॥ ३.१५ ॥

16. पुरुषार्थं संसृतिलिङ्गानां सूपकारवद् राज्ञः ॥ ३.१६ ॥

17. पाञ्चभौतिको देहः ॥ ३.१७ ॥

18.चातुर्भौतिकमित्येके ॥ ३.१८ ॥

19.ऐकभौतिकमित्यपरे ॥ ३.१९ ॥

20.न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः ॥ ३.२० ॥

21.प्रपञ्चत्वाद्यभावश्च ॥ ३.२१ ॥

22.मदशक्तिवच्चेत् प्रत्येकपरिदृष्ट सौक्ष्म्यात् सांहत्ये तदुद्भवः ॥ ३.२२ ॥

23.ज्ञानान्मुक्तिः ॥ ३.२३ ॥

24.बन्धो विपर्ययात् ॥ ३.२४ ॥

25.नियतकारणत्वान्न समुच्चयविकल्पौ ॥ ३.२५ ॥

26.स्वप्नजागराभ्यामिव मायिकामायिकाभ्यां नोभयोर्मुक्तिः पुरुषस्य ॥ ३.२६ ॥

27.इतरस्यापि नात्यन्तिकम् ॥ ३.२७ ॥

28.सङ्कल्पितेऽप्येवम् ॥ ३.२८ ॥

29.भावनोपचयाच्छुद्धस्य सर्वं प्रकृतिवत् ॥ ३.२९ ॥

30.रागोपहतिर्ध्यानम् ॥ ३.३० ॥

31.वृत्तिनिरोधात् तत्सिद्धिः ॥ ३.३१ ॥

32.धारणाऽऽसनस्वकर्मरणा तत्सिद्धिः ॥ ३.३२ ॥

33.निरोधश्छर्दिविधारणाभ्याम् ॥ ३.३३ ॥

34.स्थिरसुखमासनम् ॥ ३.३४ ॥

35.स्वकर्म स्वाश्रमविहितकर्मानुष्ठानम् ॥ ३.३५ ॥

36.वैराग्यादभ्यासाच्च ॥ ३.३६ ॥

Pustakam

37.विपर्ययभेदाः पञ्च ॥ ३.३७ ॥

38.अशक्तिरष्टाविंशतिधा ॥ ३.३८ ॥

39.तुष्टिर्नवधा ॥ ३.३९ ॥

40.सिद्धिरष्टधा ॥ ३.४० ॥

41.अवान्तरभेदाः पूर्ववत् ॥ ३.४१ ॥

42.एवमितरस्याः ॥ ३.४२ ॥

43.आध्यात्मिकादिभेदान्नवधा तुष्टिः ॥ ३.४३ ॥

44.ऊहादिभिः सिद्धिरष्टधा ॥ ३.४४ ॥

45.नेतरादितरहानेन विना ॥ ३.४५ ॥

46.देवादिप्रभेदा ॥ ३.४६ ॥

47.आब्रह्मस्तम्बपर्यन्तं तत्कृते सृष्टिराविवेकात् ॥ ३.४७ ॥

48.ऊर्ध्वं सत्त्वविशाला ॥ ३.४८ ॥

49.तमोविशाला मूलतः ॥ ३.४९ ॥

50.मध्ये रजोविशाला ॥ ३.५० ॥

51.कर्मवैचित्र्यात् प्रधानचेष्टा गर्भदासवत् ॥ ३.५१ ॥

52.आवृत्तिस्तत्राप्युत्तरोत्तरयोनियोगाद्धेयः ॥ ३.५२ ॥

53.समानं जरामरणादिजं दुःखम् ॥ ३.५३ ॥

54.न कारणलयात् कृतकृत्यता मग्नवदुत्थानात् ॥ ३.५४ ॥

55.अकार्यत्वेऽपि तद्योगः पारवश्यात् ॥ ३.५५ ॥

Pustakam

56.स हि सर्ववित् सर्वकर्ता ॥ ३.५६ ॥

57.ईदृशेश्वरसिद्धिः सिद्धा ॥ ३.५७ ॥

58.प्रधानसृष्टिः परार्थं स्वतोऽप्यभोक्तृत्वादुष्ट्रकुङ्कुमवहनवत् ॥ ३.५८ ॥

59.अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य ॥ ३.५९ ॥

60.कर्मवत् कृष्टे ( दृष्टे?÷ ) र्वा कालादेः ॥ ३.६० ॥

61.स्वभावाच्चेष्टितमनभिसन्धानाद् भृत्यवत् ॥ ३.६१ ॥

62.कर्माकृष्टेर्वाऽप्यनादितः ॥ ३.६२ ॥

63.विविक्तबोधात् सृष्टिनिवृत्तिः प्रधानस्य सूदवत् पाके ॥ ३.६३ ॥

64.इतर इतरज्जहाति तद्दोषात् ॥ ३.६४ ॥

65.द्वयोरेकतरस्य वौदासीन्यमपवर्गः ॥ ३.६५ ॥

66.अन्यसृष्ट्युपरागेऽपि न विरज्यतेऽप्रबुद्धरज्जुतत्त्वस्येवोरगः ॥ ३.६६ ॥

67.कर्मनिमित्तयोगाच्च ॥ ३.६७ ॥

68.नैरपेक्ष्येऽपि प्रकृत्युपकारेऽविवेको निमित्तम् ॥ ३.६८ ॥

69.नर्तकीवत् प्रवृत्तस्यापि निवृत्तिश्चारितार्थ्यत्वात् ॥ ३.६९ ॥

70.दोषबोधेऽपि नोपसर्पणं प्रधानस्य कुलवधूवत् ॥ ३.७० ॥

71.नैकान्ततो बन्धमोक्षौ पुरुषस्याविवेकादृते ॥ ३.७१ ॥

72.प्रकृतेराञ्जस्यात् ससङ्गत्वात् पशुवत् ॥ ३.७२ ॥

73.रूपैः सप्तभिरात्मानं बध्नाति प्रधानं कोशकारवद् विमोचयत्येकेन रूपेण ॥ ३.७३ ॥

Pustakam

74.निमित्तत्वमविवेकस्य न दृष्टहानिः ॥ ३.७४ ॥

75.तत्त्वाभ्यासान्नेति नेतीति त्यागाद् विवेकसिद्धिः ॥ ३.७५ ॥

76.अधिकारिप्रभेदान्न नियमः ॥ ३.७६ ॥

77.बाधितानुवृत्तेर्मध्यविवेकतोऽप्युपभोगः ॥ ३.७७ ॥

78.जीवन्मुक्तश्च ॥ ३.७८ ॥

79.उपदेश्योपदेष्टृत्वात् तत्सिद्धिः ॥ ३.७९ ॥

80.श्रुतिश्च ॥ ३.८० ॥

81.इतरथाऽन्धपरम्परा ॥ ३.८१ ॥

82.चक्रभ्रमणवद् धृतशरीरः ॥ ३.८२ ॥

83.संस्कारलेशतस्तत्सिद्धिः ॥ ३.८३ ॥

84.विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यो नेतरान्नेतरात् ॥ ३.८४ ॥

Pustakam

# चतुर्थोऽध्यायः

1. राजपुत्रवत् तत्वोपदेशात् ॥ ४.१ ॥
2. पिशाचवदन्यार्थोपदेशेऽपि ॥ ४.२ ॥
3. आवृत्तिरसकृदुपदेशात् ॥ ४.३ ॥
4. पितापुत्रवदुभयोर्दृष्टत्वात् ॥ ४.४ ॥
5. श्येनवत् सुखदुःखी त्यागवियोगाभ्याम् ॥ ४.५ ॥
6. अहिर्निर्व्लयिनीवत् ॥ ४.६ ॥
7. छिन्नहस्तवद्वा ॥ ४.७।
8. असाधनानुचिन्तनं बन्धाय भरतवत् ॥ ४.८ ॥
9. बहुभिर्योगे विरोधो रागादिभिः कुमारीशङ्खवत् ॥ ४.९ ॥
10. द्वाभ्यामपि तथैव ॥ ४.१० ॥
11. निराशः सुखी पिङ्गलावत् ॥ ४.११ ॥
12. अनारम्भेऽपि परगृहे सुखी सर्पवत् ॥ ४.१२ ॥
13. बहुशास्त्रगुरूपासनेऽपि सारादानं षट्पदवत् ॥ ४.१३ ॥
14. इषुकारवन्नैकचित्तस्य समाधिहानिः ॥ ४.१४ ॥
15. व्रतनियमलङ्घनादानर्थक्यं लोकवत् ॥ ४.१५ ॥
16. तद्विस्मरणेऽपि भेकीवत् ॥ ४.१६ ॥
17. नोपदेशश्रवणेऽपि कृतकृत्यता परामर्शादृते विरोचनवत् ॥ ४.१७ ॥

Pustakam

18.दृष्टस्तयोरिन्द्रस्य ॥ ४.१८ ॥

19.प्रणतिब्रह्मचर्योपसर्पणानि कृत्वा सिद्धिर्बहुकालात् तद्वत् ॥ ४.१९ ॥

20.न कालनियमो वामदेववत् ॥ ४.२० ॥

21.अध्यस्तरूपोपासनात् पारम्पर्येण यज्ञोपासकानामिव ॥ ४.२१ ॥

22.इतरलाभेऽप्यावृत्तिः पञ्चाग्नियोगतो जन्मश्रुतेः ॥ ४.२२ ॥

23.विरक्तस्य हेयहानमुपादेयोपादानं हंसक्षीरवत् ॥ ४.२३ ॥

24.लब्धातिशययोगात् तद्वत् ॥ ४.२४ ॥

25.न कामचारित्वं रागोपहते शुकवत् ॥ ४.२५ ॥

26.गुणयोगाद् बद्धः शुकवत् ॥ ४.२६ ॥

27.न भोगाद्रागशान्तिर्मुनिवत् ॥ ४.२७ ॥

28.दोषदर्शनादुभयोः ॥ ४.२८ ॥

29.न मलिनचेतस्युपदेशबीजप्ररोहोऽजवत ॥ ४.२९ ॥

30.नाभासमात्रमपि मलिनदर्पणवत् ॥ ४.३० ॥

31.न तज्जस्यापि तद्रूपता पङ्कजवत् ॥ ४.३१ ॥

32.न भूतियोगेऽपि कृतकृत्यतोपास्यसिद्धिवदुपास्यसिद्धिवत् ॥ ४.३२ ॥

Pustakam

# पञ्चमोऽध्यायः

1. मङ्गलाचरणं शिष्टाचारात् फलदर्शनात् श्रुतितश्चेति ॥ ५.१ ॥
2. नेश्वराधिष्ठिते फलसम्पत्तिः कर्मरणा तत्सिद्धेः ॥ ५.२ ॥
3. स्वोपकारादधिष्ठानं लोकवत् ॥ ५.३ ॥
4. लौकिकेश्वरवदितरथा ॥ ५.४ ॥
5. पारिभाषिको वा ॥ ५.५ ॥
6. न रागादृते तत्सिद्धिः प्रतिनियतकारणत्वात् ॥ ५.६ ॥
7. तद्योगेऽपि न नित्यमुक्तः ॥ ५.७ ॥
8. प्रधानशक्तियोगाच्चेत् सङ्गापत्तिः ॥ ५.८ ॥
9. सत्तामात्राच्चेत् सर्वैश्वर्यम् ॥ ५.९ ॥
10. प्रमाणाभावान्न तत्सिद्धिः ॥ ५.१० ॥
11. सम्बन्धाभावान्नानुमानम् ॥ ५.११ ॥
12. श्रुतिरपि प्रधानकार्यत्वस्य ॥ ५.१२ ॥
13. नाविद्याशक्तियोगो निःसङ्गस्य ॥ ५.१३ ॥
14. तद्योगे तत्सिद्धावन्योऽन्याश्रयत्वम् ॥ ५.१४ ॥
15. न बीजाङ्कुरवत् सादिसंसारश्रुतेः ॥ ५.१५ ॥
16. विद्यातोऽन्यत्वे ब्रह्मबाधप्रसङ्गः ॥ ५.१६ ॥
17. अबाधे नैष्फल्यम् ॥ ५.१७ ॥

Pustakam

18.विद्याबाध्यत्वे जगतोऽप्येवम् ॥ ५.१८ ॥

19.तद्रूपत्वे सादित्वम् ॥ ५.१९ ॥

20.न धर्मापलापः प्रकृतिकार्यवैचित्र्यात् ॥ ५.२० ॥

21.श्रुतिलिङ्गादिभिस्तत्सिद्धिः ॥ ५.२१ ॥

22.न नियमः प्रमाणान्तरावकाशात् ॥ ५.२२ ॥

23.उभयत्राप्येवम् ॥ ५.२३ ॥

24.अर्थात् सिद्धिश्चेत् समानमुभयोः ॥ ५.२४ ॥

25.अन्तःकरणधर्मत्वं धर्मादीनाम् ॥ ५.२५ ॥

26.गुणानां ( गुणादीनां ? ) नात्यन्तबाधः ॥ ५.२६ ॥

27.पञ्चावयवयोगात् सुखसंवित्तिः ॥ ५.२७ ॥

28.न सकृद् ग्रहणात् सम्बन्धसिद्धिः ॥ ५.२८ ॥

29.नियतधर्मसाहित्यमुभयोरेकतरस्य वा व्याप्तिः ॥ ५.२९ ॥

30.न तत्त्वान्तरं वस्तुकल्पनाप्रसक्तेः ॥ ५.३० ॥

31.निजशक्त्युद्भवमित्याचार्याः ॥ ५.३१ ॥

32.आधेयशक्तियोग इति पञ्चशिखः ॥ ५.३२ ॥

33.न स्वरूपशक्तिनियमः पुनर्वादप्रसक्तेः ॥ ५.३३ ॥

34.विशेषणानर्थक्यप्रसक्तेः ॥ ५.३४ ॥

35.पल्लवादिष्वनुपपत्तेश्च ॥ ५.३५ ॥

36.आधेयशक्तिसिद्धौ निजशक्तियोगः समानन्यायात् ॥ ५.३६ ॥

Pustakam

37.वाच्यवाचकभावः सम्बन्धः शब्दार्थयोः ॥ ५.३७ ॥

38.त्रिभिः सम्बन्धसिद्धिः ॥ ५.३८ ॥

39.न कार्ये नियम उभयथा दर्शनात् ॥ ५.३९ ॥

40.लोक ( वद् ) व्युत्पन्नस्य वेदार्थप्रतीतिः ॥ ५.४० ॥

41.न त्रिभिरपौरुषेयत्वाद् वेदस्य तदर्थस्याप्यतीन्द्रियत्वात् ॥ ५.४१ ॥

42.न यज्ञादेः स्वरूपतो धर्मत्वं वैशिष्ट्यात् ॥ ५.४२ ॥

43.निजशक्तिर्व्युत्पत्त्या व्यवच्छिद्यते ॥ ५.४३ ॥

44.योग्यायोग्येषु प्रतीतिजनकत्वात् तत्सिद्धिः ॥ ५.४४ ॥

45.न नित्यत्वं वेदानां कार्यत्वश्रुतेः ॥ ५.४५ ॥

46.न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात् ॥ ५.४६ ॥

47.न मुक्तामुक्तयोरयोग्यत्वात् ॥ ५.४७ ॥

48.नापौरुषेयत्वान्नित्यत्वमङ्कुरादिवत् ॥ ५.४८ ॥

49.तेषामपि तद्योगे दृष्टबाधादिप्रसक्तेः ॥ ५.४९ ॥

50.यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते तत्पौरुषेयम् ॥ ५.५० ॥

51. निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यं ॥ ५.५१ ॥

52.नासतः ख्यानं नृशृङ्गवत् ॥ ५.५२ ॥

53.न सतो बाधदर्शनात् ॥ ५.५३ ॥

54.नानिर्वचनीयस्य तदभावात् ॥ ५.५४ ॥

55.नान्यथाख्यातिः स्ववचो व्याघातात् ॥ ५.५५ ॥

56.सदसत्ख्यातिर्बाधाबाधात् ॥ ५.५६ ॥

57.प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः ॥ ५.५७ ॥

58.न शब्दनित्यत्वं कार्यताप्रतीतेः ॥ ५.५८ ॥

59.पूर्वसिद्धसत्त्वस्याभिव्यक्तिर्दीपेनेव घटस्य ॥ ५.५९ ॥

60.सत्कार्यसिद्धान्तश्चेत् सिद्धसाधनम् ॥ ५.६० ॥

61.नाद्वैतमात्मनो लिङ्गात् तद्भेदप्रतीतेः ॥ ५.६१।

62.नानात्मनाऽपि प्रत्यक्षबाधात् ॥ ५.६२ ॥

63.नोभाभ्यां तेनैव ॥ ५.६३ ॥

64.अन्यपरत्वमविवेकानां तत्र ॥ ५.६४ ॥

65.नात्माऽविद्या नोभयं जगदुपादानकारणं निःसङ्गत्वात् ॥ ५.६५ ॥

66.नैकस्यानन्दचिद्रूपत्वे द्वयोर्भेदात् ॥ ५.६६ ॥

67.दुःखनिवृत्तेर्गौणः ॥ ५.६७ ॥

68.विमुक्तिप्रशंसा मन्दानाम् ॥ ५.६८ ॥

69.न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा वास्यादिवच्चक्षुरादिवत् ॥ ५.६९ ॥

70.सक्रियत्वाद् गतिश्रुतेः ॥ ५.७० ॥

71.न निर्भागत्वं तद्योगाद् घटादिवत् ॥ ५.७१ ॥

72.प्रकृतिपुरुषयोरन्यत् सर्वमनित्यम् ॥ ५.७२ ॥

73.न भागलाभो भोगिनो निर्भागत्वश्रुतेः ॥ ५.७३ ॥

74.नानन्दाभिव्यक्तिर्मुक्तिर्निर्धर्मकत्वात् ॥ ५.७४ ॥

75.न विशेषगुणोच्छित्तिस्तद्वत् ॥ ५.७५ ॥

76.न विशेषगतिर्निष्क्रियस्य ॥ ५.७६ ॥

77.नाकारोपरागोच्छित्तिः क्षणिकत्वादिदोषात् ॥ ५.७७ ॥

78.न सर्वोच्छित्तिरपुरुषार्थत्वादिदोषात् ॥ ५.७८ ॥

79.एवं शून्यमपि ॥ ५.७९ ॥

80.संयोगाश्च वियोगान्ता इति देशादिलाभोऽपि ॥ ५.८० ॥

81.न भागियोगो भागस्य ॥ ५.८१ ॥

82.नाणिमादियोगोऽप्यवश्यम्भावित्वात्तदुच्छित्तेरितरयोगवत् ॥ ५.८२ ॥

83.नेन्द्रादिपदयोगोऽपि तद्वत् ॥ ५.८३ ॥

84.न भूतप्रकृतित्वमिन्द्रियाणामाहङ्कारिकत्वश्रुतेः ॥ ५.८४ ॥

85.न षट्पदार्थनियमस्तद्बोधान्मुक्तिः ॥ ५.८५ ॥

86.षोडशादिष्वप्येवम् ॥ ५.८६ ॥

87.नाणुनित्यता तत्कार्यत्वश्रुतेः ॥ ५.८७ ॥

88.न तन्निर्भागत्वं कार्यत्वात् ॥ ५.८८ ॥

89.न रूपनिबन्धनात् प्रत्यक्षत्वनियमः ॥ ५.८९ ॥

90.न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात् ॥ ५.९० ॥

91.अनित्यत्वेऽपि स्थिरता योगात् प्रत्यभिज्ञानं सामान्यस्य ॥ ५.९१ ॥

92.न तदपलापस्तस्मात् ॥ ५.९२ ॥

Pustakam

93.नान्यनिवृत्तिरूपत्वं भावप्रतीतेः ॥ ५.९३ ॥

94.न तत्त्वान्तरं सादृश्यं प्रत्यक्षोपलब्धेः ॥ ५.९४ ॥

95.निजशक्त्यभिव्यक्तिर्वा वैशिष्ट्यात् तदुपलब्धेः ॥ ५.९५ ॥

96.न संज्ञासंज्ञिसम्बन्धोऽपि ॥ ५.९६ ॥

97.न सम्बन्धनित्यतोभयानित्यत्वात् ॥ ५.९७ ॥

98.नाजः सम्बन्धो धर्मिग्राहकप्रमाणबाधात् ॥ ५.९८ ॥

99.न समवायोऽस्ति प्रमाणाभावात् ॥ ५.९९ ॥

100.उभयत्राप्यन्यथासिद्धेर्न प्रत्यक्षमनुमानं वा ॥ ५.१०० ॥

101.नानुमेयत्वमेव क्रियाया नेदिष्ठस्य तत्तद्वतोरेवापरोक्षप्रतीतेः ॥ ५.१०१ ॥

102.न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात् ॥ ५.१०२ ॥

103.न स्थूलमिति नियम आतिवाहिकस्यापि विद्यमानत्वात् ॥ ५.१०३ ॥

104.नाप्राप्तप्रकाशकत्वमिन्द्रियाणामप्राप्तेः सर्वप्राप्तेर्वा ॥ ५.१०४ ॥

105.न तेजोऽपसर्पणात् तैजसं चक्षुर्वृत्तितस्तत्सिद्धेः ॥ ५.१०५ ॥

106.प्राप्तार्थप्रकाशलिङ्गाद् वृत्तिसिद्धिः ॥ ५.१०६ ॥

107.भागगुणाभ्यां तत्त्वान्तरं वृत्तिः सम्बन्धार्थं सर्पतीति ॥ ५.१०७ ॥

108.न द्रव्ये नियमस्तद्योगात् ॥ ५.१०८ ॥

109.न देशभेदेऽप्यन्योपादानताऽस्मदादिवन्नियमः ॥ ५.१०९ ॥

110.निमित्तव्यपदेशात् तद्व्यपदेशः ॥ ५.११० ॥

Pustakam

111.ऊष्मजाण्डजजरायुजोद्भिज्जं साङ्कल्पिकसांसिद्धिकं चेति न नियमः ॥ ५.१११ ॥

112.सर्वेषु पृथिव्युपादानमसाधारण्यात् तद्व्यपदेशः पूर्ववत् ॥ ५.११२ ॥

113.न देहारम्भकस्य प्राणत्वमिन्द्रियशक्तितस्तत्सिद्धेः ॥ ५.११३ ॥

114.भोक्तुरधिष्ठानाद् भोगायतननिर्माणमन्यथा पूतिभावप्रसक्तिः ( प्रसक्तेः ? ) ॥ ५.११४ ॥

115.भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्तात् ॥ ५.११५ ॥

116.समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता ॥ ५.११६ ॥

117.द्वयोः सबीजत्वमन्यस्य तद्धतिः ॥ ५.११७ ॥

118.द्वयोरिव त्रयस्यापि दृष्टत्वान्न तु द्वौ ॥ ५.११८ ॥

119.वासनयाऽनर्थख्यापनं दोषयोगेऽपि न निमित्तस्य प्रधानबाधकत्वम् ॥ ५.११९ ॥

120.एकः संस्कारः क्रियानिर्वर्तको न तु प्रतिक्रियं संस्कारभेदा बहुकल्पनाप्रसक्तेः ॥ ५.१२० ॥

121.न बाह्यबुद्धिनियमः ॥ ५.१२१ ॥

122.वृक्षगुल्मलतौषधिवनस्पतितृणवीरुधादीनामपि भोक्तृभोगायतनत्वं पूर्ववत् ॥ ५.१२२ ॥

123.स्मृतेश्च ॥ ५.१२३ ॥

124.न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः ॥ ५.१२४ ॥

Pustakam

125.त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः ॥ ५.१२५ ॥

126.न किञ्चिदप्यनुशयिनः ॥ ५.१२६ ॥

127.न बुद्ध्यादिनित्यत्वमाश्रयविशेषेऽपि वह्निवत् ॥ ५.१२७ ॥

128.आश्रयासिद्धेश्च ॥ ५.१२८ ॥

129.योगसिद्धयोऽप्यौषधादिसिद्धिवन्नापलपनीयाः ॥ ५.१२९ ॥

130.न भूतचैतन्यं प्रत्येकानुपलब्धेः सांहत्ये च सांहत्ये च ॥ ५.१३० ॥

Pustakam

# षष्ठोऽध्यायः

1. अस्त्यात्मा नास्तित्वसाधनाभावात् ॥ ६.१ ॥
2. देहादिव्यतिरिक्तोऽसौ वैचित्र्यात् ॥ ६.२ ॥
3. षष्ठीव्यपदेशादपि ॥ ६.३ ॥
4. न शिलापुत्रवद् धर्मिग्राहकमानबाधात् ॥ ६.४ ॥
5. अत्यन्तदुःखनिवृत्त्या कृतकृत्यता ॥ ६.५ ॥
6. यथा दुःखात् क्लेशः पुरुषस्य न तथा सुखादभिलाषः ॥ ६.६ ॥
7. कुत्रापि कोऽपि सुखी न ॥ ६.७ ॥
8. तदपि दुःखशबलमिति दुःखपक्षे निःक्षिपन्ते विवेचकाः ॥ ६.८ ॥
9. सुखलाभाभावादपुरुषार्थत्वमिति चेन्नैवं द्वैविध्यात् ॥ ६.९ ॥
10. निर्गुणत्वमात्मनोऽसङ्गत्वादिश्रुतेः ॥ ६.१० ॥
11. परधर्मत्वेऽपि तत्सिद्धिरविवेकात् ॥ ६.११ ॥
12. अनादिरविवेकोऽन्यथा दोषद्वयप्रसक्तेः ॥ ६.१२ ॥
13. न नित्यः स्यादात्मवदन्यथाऽनुच्छित्तिः ॥ ६.१३ ॥
14. प्रतिनियतकारणनाश्यत्वमस्य ध्वान्तवत् ॥ ६.१४ ॥
15. अत्रापि प्रतिनियमोऽन्वयव्यतिरेकात् ॥ ६.१५ ॥
16. प्रकारान्तरासम्भवादविवेक एव बन्धः ॥ ६.१६ ॥
17. न मुक्तस्य पुनर्बन्धयोगोऽप्यानावृत्तिश्रुतेः ॥ ६.१७ ॥

Pustakam

18.अपुरुषार्थत्वमन्यथा ॥ ६.१८ ॥

19.अविशेषापत्तिरुभयोः ॥ ६.१९ ॥

20.मुक्तिरन्तरायध्वस्तेर्न परः ॥ ६.२० ॥

21.तत्राप्यविरोधः ॥ ६.२१ ॥

22.अधिकारित्रैविध्यान्न नियमः ॥ ६.२२ ॥

23.दार्ढ्यार्थमुत्तरेषाम् ॥ ६.२३ ॥

24.स्थिरसुखमासनमिति न नियमः ॥ ६.२४ ॥

25.ध्यानं निर्विषयं मनः ॥ ६.२५ ॥

26.उभयथाऽप्यविशेषश्चेन्नैवमुपरागनिरोधाद् विशेषः ॥ ६.२६ ॥

27.निःसङ्गेऽप्युपरागोऽविवेकात् ॥ ६.२७ ॥

28.जपास्फटिकयोरिव नोपरागः किन्त्वभिमानः ॥ ६.२८ ॥

29.ध्यानधारणाभ्यासवैराग्यादिभिस्तन्निरोधः ॥ ६.२९ ॥

30.लयविक्षेपयोर्व्यावृत्त्येत्याचार्याः ॥ ६.३० ॥

31.न स्थाननियमश्चित्तप्रसादात् ॥ ६.३१ ॥

32.प्रकृतेराद्योपादानताऽन्येषां कार्यत्वश्रुतेः ॥ ६.३२ ॥

33.नित्यत्वेऽपि नात्मनो योग्यत्वाभावात् ॥ ६.३३ ॥

34.श्रुतिविरोधान्न कुतर्कापसदस्यात्मलाभः ॥ ६.३४ ॥

35.पारम्पर्येऽपि प्रधानानुवृत्तिरणुवत् ॥ ६.३५ ॥

36.सर्वत्र कार्यदर्शनाद् विभुत्वम् ॥ ६.३६ ॥

Pustakam

37.गतियोगेऽप्याद्यकारणताऽहानिरणुवत् ॥ ६.३७ ॥

38.प्रसिद्धाधिक्यं प्रधानस्य न नियमः ॥ ६.३८ ॥

39.सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात् ॥ ६.३९ ॥

40.अनुपभोगेऽपि पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुङ्कुमवहनवत् ॥ ६.४० ॥

41.कर्मवैचित्र्यात् सृष्टिवैचित्र्यम् ॥ ६.४१ ॥

42.साम्यवैषम्याभ्यां कार्यद्वयम् ॥ ६.४२ ॥

43.विमुक्तबोधान्न सृष्टिः प्रधानस्य लोकवत् ॥ ६.४३ ॥

44.नान्योपसर्पणेऽपि मुक्तोपभोगो निमित्ताभावात् ॥ ६.४४ ॥

45.पुरुषबहुत्वं व्यवस्थातः ॥ ६.४५ ॥

46.उपाधिश्चेत्तत्सिद्धौ पुनर्द्वैतम् ॥ ६.४६ ॥

47.द्वाभ्यामपि प्रमाणविरोधः ॥ ६.४७ ॥

48.द्वाभ्यामप्यविरोधान्न पूर्वमुत्तरञ्च साधकाभावात् ॥ ६.४८ ॥

49.प्रकाशतस्तत्सिद्धौ कर्मकर्तृविरोधः ॥ ६.४९ ॥

50.जडव्यावृत्तो जडं प्रकाशयति चिद्रूपः ॥ ६.५० ॥

51.न श्रुतिविरोधो रागिणां वैराग्याय तत्सिद्धेः ॥ ६.५१ ॥

52.जगत्सत्यत्वमदुष्टकारणजन्यत्वाद् बाधकाभावात् ॥ ६.५२ ॥

53.प्रकारान्तरासम्भवात् सदुत्पत्तिः ॥ ६.५३ ॥

54.अहङ्कारः कर्ता न पुरुषः ॥ ६.५४ ॥

55.चिदवसाना भुक्तिस्तत्कर्मार्जितत्वात् ॥ ६.५५ ॥



Pustakam

56.चन्द्रादिलोकेऽप्यावृत्तिर्निमित्तसद्भावात् ॥ ६.५६ ॥

57.लोकस्य नोपदेशात् तत्सिद्धिः पूर्ववत् ॥ ६.५७ ॥

58.पारम्पर्येण तत्सिद्धौ विमुक्तिश्रुतिः ॥ ६.५८ ॥

59.गतिश्रुतेश्च व्यापकत्वेऽप्युपाधियोगाद् भोगदेशकाललाभो व्योमवत् ॥ ६.५९ ॥

60.अनधिष्ठितस्य पूतिभावप्रसङ्गान्न तत्सिद्धिः ॥ ६.६० ॥

61.अदृष्टद्वारा चेदसम्बद्धस्य तदसम्भवाज्जलादिवदङ्कुरे ॥ ६.६१ ॥

62.निर्गुणत्वात् तदसम्भवादहङ्कारधर्मा ह्येते ॥ ६.६२ ॥

63.विशिष्टस्य जीवत्वमन्वयव्यतिरेकात् ॥ ६.६३ ॥

64.अहङ्कारकर्त्रधीना कार्यसिद्धिर्नेश्वराधीना प्रमाणाभावात् ॥ ६.६४ ॥

65.अदृष्टोद्भूतिवत् समानम् ॥ ६.६५ ॥

66.महतोऽन्यत् ॥ ६.६६ ॥

67.कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोऽप्यनादिर्बीजाङ्कुरवत् ॥ ६.६७ ॥

68.अविवेकनिमित्तको वा पञ्चशिखः ॥ ६.६८ ॥

69.लिङ्गशरीरनिमित्तक इति सनन्दनाचार्यः ॥ ६.६९ ॥

70.यद्वा तद्वा तदुच्छित्तिः पुरुषार्थस्तदुच्छित्तिः पुरुषार्थः ॥ ६.७० ॥

Pustakam